# AC–3231

Seat No.________

## M. A. (Part-II) Examination

April / May – 2003

## Sanskrit : (Speical) Paper-VII

***(1) अलङ्कारशास्त्रम् (Optional)***

***(2) व्याकरणशास्त्रम् (Optional)***

***(3) वेदान्तशास्त्रम् (Optional)***

***(4) पुराणशास्त्र (Optional)***

***(5) सांख्ययायोगशास्त्रम् (Optional)***

Time : **3** Hours] [Total Marks : **100**

**સૂચના :** (૧) બધા જ પ્રશ્નો **ફરજિયાત** છે.
(૨) **જમણી** બાજુના અંકો પ્રશ્નોના **ગુણ** દર્શાવે છે.

**Instructions :** (1) **All** questions are **compulsory**.
(2) Figures to the **right** indicate **marks** of questions.

## *(1) अलङ्कारशास्त्रम् (Optional)*

*(१) नाट्यशास्त्रम् (अभिनव भारतीसहितम्, ६ मात्रम्, १६, १८, १९)*

*(२) नाट्यदर्पणम्*

*(३) काव्यमीमांसा*

**૧** (અ) સસંદર્ભ સમજાવો : (ગમે તે બે) **૧૨**

**1** (a) Explain citing reference, any **two** : **12**

(१) भारती सात्वती चैव कैशिक्यारभटी तथा ।
चतस्रो वृत्तयो ह्येता यासु नाट्यं प्रतिष्ठितम् ॥

(२) षट्त्रिंशदेतानि तु लक्षणानि प्रोक्तानि वै भूषणसंमितानि ।
काव्येषु भावार्थगतानि तज्ज्ञैः सम्यक् प्रयोज्यानि यथारसं तु ॥

(३) देवासुरबीजकृतः प्रख्यातोदात्तनायकश्चैव ।
त्र्यङ्कस्तथा त्रिकपटस्त्रिविद्रवः स्यात् त्रिशृङ्गारः ॥

(४) यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङगोऽन्यः प्रयुज्यते ।
आगन्तुकेन भावेन पताकास्थानं तु तत् ॥

(બ) સસંદર્ભ સસજાવો : (ગમે તે **એક**) ૬

(b) Explain citing reference : (any **one**) **6**

(१) न चात्र नर्तक एव सुखीति प्रतिपत्तिः । नाप्ययमेव राम इति । न चाप्ययं न सुखीति । नापि रामः स्याद्वा न वायमिति । न चापि तत्सदृश इति। किन्तु सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणा चित्रतुरगादिन्यायेन।

(२) अन्ये त्वादिशब्दं करुणवाचिनमाश्रित्य तदीयानुभावान् प्राधान्येन दर्शयति। एकशेषेण द्वयमप्यन्ये । विप्रलम्भो विडम्बनं सिद्धम् । इह तूपचारात्तदीयं फलं विरहात्मकं गृह्यते । न हि परस्परं रतिमतोर्विडम्बनमस्ति । तेन विरहेण कृतः सुष्ठुतमां प्रोषित इति दर्शयन्मुनिनेन विना शृङ्गारो न प्रयोगे न काव्ये हृद्यतामवलम्बत इति दर्शयति ।

**૨** નીચેનામાંથી કોઈ પણ **ચાર** સમજાવો : **૧૬**

**2** Explain any **four** of the following : **16**

(१) पञ्चमी साहित्यविद्या इति यायावरीयः । सा हि चतुस्राणामपि विद्यानां निष्यन्दः ।

(२) तत्र वेषविन्यासक्रमः प्रवृत्तिः, विलासविन्यासक्रमो वृत्ति, वचनविन्यासक्रमो रीतिः ।

(३) 'अभ्यासः' इति मङ्गलः । अविच्छेदेन शीलनमभ्यासः । स हि सर्वगामी सर्वत्र निरतिशयं कौशलमाधत्ते ।

(४) काकुर्वक्रोक्तिर्नाम शब्दाऽलङ्कारोऽयम् इति रुद्रटः । अभिप्रायावान्पाठधर्मं काकुः, स कथमलङकारो स्यात् ? इति यायावरीयः ।

(५) आसंसारमुदारैः कविभिः प्रतिदिनगृहीतसारोऽपि ।<br>अद्याप्यभिन्नमुद्रो विभाति वाचां परिस्पन्दः ॥

(६) कुक विप्रलम्भेऽपि रसवत्तां निरस्यति ।<br>अस्तु वस्तुषु मा वा भूत्कविवाचि रसः स्थितिः ॥

(७) तत्रान्ययोनिर्द्विधा प्रतिबिम्बकल्पः, आलेख्यप्रख्यश्च ।<br>निह्नुतयोनिरपि द्विधातुल्यदेहितुल्यः परपुरप्रवेशसदृशश्च ।

(८) काव्यार्थानां द्वादश योनयः' इति आचार्याः ।

૩ (અ) સસંદર્ભ સમજાવો : (ગમે તે બે) ૧૨

3 (a) Explain citing reference : (any **two**) 12

(१) नीरसानुचितं सूच्यं प्रयोज्यं तद्विपर्ययः ।
उह्यं तदविनाभूतं, उपेक्ष्यं तु जुगुप्सितम् ॥

(२) भाणः प्रधान–शृङ्गारवीरोमुखनिर्वाहवान् ।
एकाङ्को दशलास्याङ्गः प्रायो लोकानुरञ्जकः ॥

(३) न तथाऽर्थ–शब्दोत्प्रेक्षाः श्लाह्याः काव्ये यथा रसः ।
विपाककम्रमप्याम्रं उद्वेजयति नीरसम् ॥

(४) प्रवेश–निष्क्रमाक्षेप–प्रसादान्तर–सङ्गतम् ।
चित्रार्थं रूपकं गेयं, पञ्चधा स्यात् कविध्रुवा ॥

(બ) સસંદર્ભ સમજાવો : (ગમે તે **એક**) ૬

(b) Explain citing reference : (any **one**) 6

(१) मुख्यस्य स्वतन्त्रस्य महावाक्यार्थस्यांशा भागाः परस्परं स्वरूपेण चाङ्गैः सन्धीयन्त इति सन्धयः, अवस्थाभिः प्रारम्भादिभिरनुगता अनुयाता अवस्थासमाप्तौ समाप्यन्त इत्यर्थः । अवस्थानां च ध्रुवभावित्वात् सन्धयोऽपि नाटक-प्रकरण-नाटिकाप्रकरणीषु पञ्चावश्यभाविनः । समवकारादौ तु विशेषोपादानादूनत्वेऽपि न दोषः ।

(२) आरेण प्रतोदकेन तुल्या भटा उद्धताः पुरुषा आरभटास्ते सन्त्यस्यामिति 'ज्योत्स्नादित्वादणि' आरभटी। अनृतमसत्यम् । द्वन्द्वयुद्धमनेकप्रकारम् । छद्मवञ्चनाहेतुः प्रयोगः, अनेनेन्द्रजाल–पुस्तप्रयोगच्छेद्य–भेद्यादिग्रहः । दीप्ता रसा रौद्रादय औद्धत्यावेगादिहेतवः । अत्रानृतादिभिः विचित्रनेपथ्य–किलिञ्चहस्तिप्रयोग–मायाशिरोदर्शनादिकम् ।

૪ ભરતરસસૂત્રના આધારે (ભરતના રસસૂત્ર મુજબ) રસનિષ્પત્તિ વિષેના અભિનવગુપ્તના મતની સમીક્ષા કરો. ૧૬

4 Explain the various interpretations of भरतरससूत्र and study the view of अभिनवगुप्त on the रसनिष्पत्ति. 16

**અથવા/OR**

૪ **નીચેનામાંથી ગમે તે બે ભરતની દૃષ્ટિએ સમજાવો :** **૧૬**

4 Explain any **two** from the following according to Bharata's view : **16**

(१) गुणकीर्तनम् । (२) प्रकरणलक्षणानि ।

(३) पञ्च सन्धयः । (४) शृङ्गाररसः ।

૫ **રાજશેખરે ચર્ચેલી** कविसमय **સમજાવીને કાવ્યમાં તેમનું મહત્ત્વ શું છે, તે દર્શાવો.** **૧૬**

5 Explain कविसमय as discussed by राजशेखर and pointout their importance in काव्य. **16**

**અથવા/OR**

૫ **નીચેનામાંથી કોઈ પણ બે વિષે નોંધ લખો :** **૧૬**

5 Write notes on any **two** of the following : **16**

(१) काव्यपुरुषोत्पत्तिः ।

(२) काव्यपाकः ।

(३) शब्दार्थहरणम् ।

(४) कविदिनचर्या । (कवि चर्या)

૬ सुखदुःखात्मको रसः । – **સવિસ્તર ચર્ચો.** **૧૬**

6 सुखदुःखात्मको रसः । – Discuss fully **16**

**અથવા/OR**

૬ **નીચેનામાંથી ગમે તે બે ઉપર વિવેચનાત્મક નોંધ લખો :** **૧૬**
**(નાટ્યદર્પણને અનુસરીને)**

6 Write critical notes on any **two** of the following according to the नाट्यदर्पणम् **16**

(१) व्यायोगलक्षणम् । (२) अर्थोपक्षेपकाः ।

(३) नायिकाभेदाः । (४) चतस्रः नाट्यमातरः ।

## (2) व्याकरणशास्त्र (Optional)

*(१) सिद्धान्तकौमुदी (उत्तरार्धः)*
*(२) वाक्यपदीयम् (ब्रह्मकाण्डम्)*
*(३) परिभाषेन्दुशेखरः (प्रथमतन्त्रम्)*

१ નીચેનામાંથી ગમે તે **પાંચ** સૂત્રોને સમજાવો : २०

**1** Explain any **five** aphorisms of the following : **20**

(१) लः कर्मणि च भावे चाकर्मकेभ्यः । ३–४–६९

(२) कृञ्चानुप्रयुज्यते लिटि । ३–१–४०

(३) सनाद्यन्ता धातवः । ३–१–३२

(४) धातोरेकाचो हलादेः क्रियासमभिहारे यङ् । ३–१–२२

(५) आत्मनेपदेष्वनतः । ७–१–५

(६) लिङ्निमित्ते लृङ् क्रियातिपत्तौ । ३–३–१३९

(७) युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः । १–४–१०५

(८) स्वरितञितः कर्त्रभिप्राये क्रियाफले । १–३–७२

२ નીચેનામાંથી ગમે તે **પાંચ** રૂપોની પ્રક્રિયા દર્શાવો. २०

**2** Show the word formation of any **five** of the following : **20**
पस्पर्द्धे । भविता । भवेयुः । एधाञ्चक्रे । अत्स्यति । सुनोति । अभूत् । भविष्यन्ति । पिपठिषति ।

३ નીચેનામાંથી ગમે તે **બે** સંદર્ભ આપી સમજાવો : १५

**3** Explain giving context, any **two** of the following : **15**

(१) अनेकान्ता अनवयवा इत्यर्थः । यो ह्यवयवः स कदाचित्तत्रोपल्यत एव, अयं तु न तथा, तदर्थभूते विधेये कदाप्यदर्शनात् । शित्किदित्यादौ समीपेऽवयवत्वारोपेण समासो बोध्यः । वुञ्छण्कठ$_0$ इत्यादौ णित्वप्रयुक्तं कार्यं पूर्वस्यैवेत्यादि तु व्याख्यानतो निर्णेयम् ।

(२) प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापक न्याय सिद्धानि भाष्यवार्त्तिकयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते ।

(३) आकडाराधिकारस्थ 'भ'–'पद'–संज्ञादिविषये तु यथोद्देशपक्ष एव इति तत्रत्य परत्वेनैव बाध्यबाधकभावः ।

(४) नानुबन्धकृतमनेकाल्त्वम् । शिद्ग्रहणमेवैतज्ज्ञापकम् । तेन 'अर्वणस्त्रसावनञः' इत्यादेर्न सर्वादेशत्वम् । डादिविषये तु सर्वादेशत्वं विनाऽनुबन्धत्वस्यैवाभावेनुपूर्व्यात्सिद्धम् ॥

४ નીચેનામાંથી ગમે તે **એક** પરિભાષાને સ્પષ્ટ સમજાવો : **૧૫**

**4** Explain clearly any **one** of the following : **15**

(क) कार्यकालं संज्ञापरिभाषम् ।

(ख) व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ।

(ग) यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ।

५ નીચેનામાંથી ગમે તે **બે** કારિકાઓ સમજાવો : **૧૫**

**5** Explain any **two** of the following : **15**

(१) प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक्पृथक् ॥

(२) द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः ।
एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते ॥

(३) पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ॥

(४) आद्यः करणविन्यासः प्राणस्योर्ध्वं समीरणम् ।
स्थानानामभिघातश्च न विना शब्दभावनाम् ॥

૬ નીચેનામાંથી ગમે તે **બે** વિષે ટૂંકનોંધ લખો : **૧૫**

**6** Write short-notes on any **two** of the following : **15**

(१) स्फोटात्मकस्य शब्दब्रह्मणः स्वरूपम् ।

(२) वाक्यपदीये व्याकरणस्मृतेः प्रशंसा ।

(३) प्राकृतशब्दानाम् अर्थवाचकत्वम् ।

(४) अभिव्यक्तिवादिनां वादत्रयम् ।

**અથવા / OR**

૬ भर्तृहरिसम्मतानि प्रमाणानि ।–સોદાહરણ ચર્ચો. **૧૫**

**6** Discuss with illustration : 'भर्तृहरिसम्मतानि प्रमाणानि ।' **15**

## *(3) वेदान्तशास्त्र (Optional)*

### (Vedāntashāstra)

*(१) श्रीभाष्यम् (१, १, १)*

*(२) अणुभाष्यम् (नियतांशः)*

१ નીચેનામાંથી ગમે તે **બે** ભાષ્યખંડો સમજાવો : **૧૬**

**1** Explain any **two** of the following : **16**

(१) ज्ञातुमिच्छा जिज्ञासा। इच्छाया इष्यमाणप्रधानत्वात् इष्यमाणं ज्ञानमिह विधीयते। मीमांसापूर्वभागज्ञातस्य कर्मणोऽल्पास्थिरफलत्वात् उपरितनभागावसेयस्य ब्रह्मज्ञानस्यानन्ताक्षयफलत्वाच्च पूर्ववृत्तात्कर्मज्ञानादनन्तरं, तत एव हेतोः ब्रह्म–ज्ञातव्यमित्युक्तं भवति। तदाह वृत्तिकारः–वृत्तात्कर्माधिगमादनन्तरं ब्रह्मविवि–दिषा (बो.वृ.) इति। वक्ष्यति च कर्मब्रह्ममीमांसयोरैकशास्त्र्यं– 'संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेन इति शास्त्रैकत्वसिद्धिः' (बो. वृ) इति। अतः प्रतिपिपादयिषितार्थभेदेन षट्कभेदवत्, अध्यायभेदवत्त्व पूर्वोत्तरमीमांसयोर्भेदः।

(२) अध्ययन गृहीतस्य स्वाध्यायस्य स्वभावत एव प्रयोजनवदर्थावबोधित्वदर्शनात्, गृहीतात् स्वाध्यायादवगम्यमानान् प्रयोजनवतोऽर्थानापाततो दृष्ट्वा, तत्स्वरूपप्रकारविशेषनिर्णयफलवेदवाक्यविचाररूपमीमांसाश्रवणेऽधीतवेदः पुरुषः स्वयमेव प्रवर्तते। तत्र कर्मविधिस्वरूपे निरूपिते कर्मणामल्पास्थिरफलत्वं दृष्ट्वाध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चामृतस्वरूपानन्त – स्थिरफलापातप्रतीतेस्तन्निर्णयफलवेदान्तवाक्यविचाररूप – शारीरकमीमांसायामधिकरोति।

(३) ननु च 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. २–१–१) इत्यत्र सत्यज्ञानादयो गुणाः प्रतीयन्ते, नेत्युच्यते, सामानाधिकरण्येनैकार्थत्वप्रतीतेः। अनेक–गुण– विशिष्टाभिधानऽप्येकार्थत्वमविरुद्धमिति चेत् – अनमिधानज्ञो हि देवानां प्रियः। एकार्थत्वं नाम सर्वपदानामर्थैक्यं, विशिष्टपदार्थामिधाने विशेषणभेदेन पदाना– मर्थभेदोऽवर्जनीयः, ततश्चैकार्थत्वं न सिध्यति। एवं तर्हि सर्वपदानां पर्यायता स्यात्, भिविशिष्टार्थाभिधायित्वात्।

(४) यत्तु–मोक्षदशायामहमर्थो नानुवर्तत–इति, तदपेशलम्, तथा सत्यात्मनाश एवापवर्गः प्रकारान्तरेण प्रतिज्ञातः स्यात्। न च अहमर्थो धर्ममात्रं येन तद्विगमेऽप्यविद्यानिवृत्ताविव स्वरूपमवतिष्ठेत, प्रत्युत स्वरूपमेवाहमर्थ आत्मनः, ज्ञानं तु तस्य धर्मः, 'अहं जानामि, ज्ञानं ते जातमि' ति चाहमर्थधर्मतया ज्ञानप्रतीतिरेव। अपि च यः परमार्थतो, भ्रान्त्या वाध्यात्मिकादिदुःखैर्दुखि–तया स्वात्मानमनुसंधत्तेऽहं दुःखी 'ति' सर्वमेतद् दुःखजातर्भपुनर्मवमपोह्य कथमहमनाकुलः स्वस्थे भवेयमित्युत्पन्नमोक्ष रागः स एव तत्साधने प्रवर्तते।

૨ શ્રી રામાનુજાચાર્યે સ્વીકારેલ ચિત્ અને અચિત્નું સ્વરૂપ સમજાવો અને બ્રહ્મ સાથેનો તેમનો સંબંધ સ્પષ્ટ કરો. **૧૬**

**2** Elucidate the nature of (चित्) and (अचित्) admitted by Shri Rāmānujācārya and explain their relation with Brahman. **16**

**અથવા/OR**

૨ શ્રી ભાષ્યમાં કરેલા અવિદ્યાખંડનના સંદર્ભમાં અનુપપત્તિઓ ગણાવો અને કોઈ પણ ત્રણ અનુપપત્તિઓ સમજાવો. **૧૬**

2 In the context of the refulyation of Avidyā in the S'ribhāṣya, enumerate untenables (अनुपपत्तिः) and explain any three of them. **16**

૩ નીચેનામાંથી કોઈ પણ **બે** વિશે ટૂંક નોંધ લખો : **૧૮**

**3** Write short notes on any **two** of the following : **18**

(૧) बाध्यबाधकभावः

(૨) રામાનુજાચાર્ય પ્રમાણે બ્રહ્મજિજ્ઞાસાનું પૂર્વવૃત્ત

(2) पूर्ववृत्त of ब्रह्मजिज्ञासा according to Rāmānujācārya

(૩) अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।

(૪) રામાનુજાચાર્ય: જીવન અને કૃતિઓ

(4) Rāmānujācārya: Life and Works.

૪ ગમે તે **બે** ભાષ્યખંડો સમજાવો : **૧૬**

**4** Explain any **two** of the passages : **16**

(૧) तु शब्दः पूर्वपक्षव्यावृत्त्यर्थः निमित्तत्वस्य श्रुतिसिद्धत्वात् मतान्तरनिराकरणत्वेनाग्रे वक्ष्यते, तत् ब्रह्मैव समवायिकारणं, कुतः ? 'समन्वयात्' सम्यगनुवृत्तत्वात्, अस्तिभातिप्रियत्वेन सच्चिदानन्दरूपेणान्वयात्, नामरूपयोः कार्यरूपत्वात्, प्रकृतेरपि स्वमते तदंशत्वात्, अज्ञानात् परिच्छेदाप्रियत्वे, ज्ञानेन बाधदर्शनात्, नानात्वं त्वैच्छिकमेव जडजीवान्तर्यामिष्वेवैकैकांशप्राकट्यात्। ( १–१–३)

(૨) कांश्चित् सुखिनः कांश्चित् दुःखिनश्च प्रलयञ्च कुर्वन् विषमो निर्घृणश्चेति चेन्न, सापेक्षत्वात् जीवानां कर्मानुरोधेन सुखदुःखे प्रयच्छतीति वादिबोधनायैतदुक्तं, वस्तुतस्तु आत्मसृष्टेर्वैषम्यनैर्घृण्य– संभावनैव नास्ति, वृष्टिवत् भगवान् बीजवत् कर्म श्रुतिरेव तथा दर्शयति 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति एष उ एवासाधु कर्म कारयति तं यमधो निनीषति' 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन कर्मणे' ति च, सापेक्षमपि कुर्वन्नीश्वर इति माहात्म्यम्। (२–१–३४)

(૩) सर्वविप्लववादी ब्रह्मवाक्यान्युदाहृत्य सूत्रोक्तसिद्धान्तमन्यथाकृत्य श्रुतिसूत्रोल्लङ्घनेन प्रगल्भते, स वक्तव्यः किं जीवस्य ब्रह्मत्वं प्रतिपाद्यते जीवत्वं वा निराक्रियत इति ? आद्ये इष्टापत्तिः, न हि विस्फुल्लिङ्गोग्न्यंशोभूत्वा नाग्निः, द्वितीये स्वरूपनाशः, जीवत्वं कल्पितमिति चेन्न, 'अनेन जीवेनात्मने'ति श्रुतिविरोधात्, न च अनादिरयं जीवब्रह्मविभागो बुद्धिकृतः प्रमाणाभावात्। (२–३–१८)

(૪) ब्रह्म तूभयरूपं, उभयव्य पदेशात्, उभयरूपेण निर्गुणत्वेनानन्तगुणत्वेन सर्वविरुद्धधर्मेण रूपेण व्यपदेशात्, तर्हि कथमेकं वस्त्वनेकधा भासते ? तत्राह अहिकुण्डलवत्, यथा सर्परज्जुरनेकाकारः कुण्डलश्च भवति तथा ब्रह्मस्वरूपं सर्वप्रकारं भक्तेच्छया तथा स्फुरति, कल्पनाशास्त्रे हीदं बाधकं अनेककल्पना गौरवञ्चेति, न तु केवलं श्रुति–एक समधिगम्ये, न वा शास्त्रवैफल्यं, एवं साधनार्थत्वात्। (૩–૨–૨૭)

૫ નીચેનામાંથી ગમે તે **ત્રણ** સૂત્રો અણુભાષ્ય પ્રમાણે સમજાવો : ૧૮

5 Explain any **three** of the following according to Aṇubhāṣyạ : **18**

(૧) जन्माद्यस्य यतः शास्त्रयोनिवत्वात् (૧–૧–૨)

(૨) तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः। (૨–૧–૧૧)

(૩) चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्। (૨–૩–૧૬)

(૪) पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ। (૩–૨–૫)

(૫) आवृत्तिरसकृदुपदेशात्। (૪–૧–૧)

(૬) आतिवाहिकास्तल्लिङ्गात् (૪–૩–૫).

૬ શુદ્ધાદ્વૈત પ્રમાણે બ્રહ્મનું સ્વરૂપ સ્પષ્ટ કરો. ૧૬

6 Elucidate the nature of Brahman according to शुद्धाद्वैत. **16**

**અથવા/OR**

૬ નીચેનામાંથી ગમે તે **બે** પર ટૂંક નોંધ લખો : ૧૬

6 Write short notes on any **two** of the following : **16**

(૧) 'अणुभाष्य' इति संज्ञायाः यथार्थता

(૨) शुद्धाद्वैते जीवस्वरूपः।

(૩) जगत्संसारयोः भेदः।

(૪) मर्यादाभक्तिः।

## (4) पुराणशास्त्र

## (मत्स्यपुराण–नियतांश)

૧ નીચેનામાંથી ગમે તે **ચાર** શ્લોકો ભાષાન્તર સહિત સમજાવો : ૨૦

**1** Translate and explain any **four** of the following verses : **20**

(१) यः शरीरादभिध्याय सिसृक्षुर्विविधं जगत् ।
अप एव ससर्जाऽऽदौ तासु वीर्यमवासृजत् ॥२.२८॥

(२) वेदराशिः स्मृतो ब्रह्मा सावित्री तदधिष्ठिता ।
तस्मान्न कश्चिद्दोषः स्यात्सावित्रीगमने विभोः ॥४.१०॥

(३) तेषां दायनिमित्तं ते संग्रामास्तु सुदारुणाः ॥
वराहाद्या दश द्वौ च शण्डामर्कान्तरे स्मृताः ॥४७.४९॥

(४) यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद् भागवतमुच्यते ॥५३.२०॥

(५) द्विधा भूतं वपुः कृत्वा सिंहस्यार्धं नरस्य च ।
पितरं मे जघानैको हिरण्यकशिपुं पुरा ॥१७८.१९॥

(६) विमुक्तं न मया यस्मान्मोक्ष्यते वा कदाचन ।
महत्क्षेत्रमिदं तस्मादविमुक्तमिदं स्मृतम् ॥१८०.५४॥

(७) धर्मेणेमाः प्रजाः सर्वाः यस्माद्रञ्जयसे प्रभो ।
तस्मात्ते धर्मराजेति नाम सद्भिर्निगद्यते ॥२१३.३॥

(८) स्वाम्यमात्यो जनपदो दुर्गं दण्डस्तथैव च ।
कोशो मित्रं च धर्मज्ञ सप्ताङ्गं राज्यमुच्यते ॥२२०.१९॥

૨ મત્સ્યપુરાણની અંદર આવતા સૃષ્ટિ સર્જનને લગતા વિવિધ ખ્યાલોનું નિરૂપણ કરો.

**2** Depict the various views of creation in the मत्स्यपुराण.

**અથવા/OR**

૨ મત્સ્યપુરાણમાં દેખાતી પ્રાચીન ભારતીય સમાજવ્યવસ્થા આલેખો.

**2** Depict the ancient Indian Social condition as reflected in the Matsya Purana.

૩ નર્મદા-માહાત્મ્ય ઉપર આલોચનાત્મક નોંધ લખો.

**3** Write a critical note on the Narmadāmāhātmya.

**અથવા/OR**

૩ મત્સ્યપુરાણ પ્રમાણે જમ્બૂદ્વીપાદિનું વિવરણ આલેખો.

**3** Give the explanation of the Jambu-dvipa and other dvipas according to the मत्स्यपुराण.

૪ 'પુરાણ'નો ઉદ્ભવ અને વિકાસ ચર્ચો.

**4** Discuss the origin and the development of a 'Purāṇa'

**અથવા/OR**

૪ 'મત્સ્યપુરાણ જ્ઞાનકોશ છે' - ચર્ચો.

**4** 'The Matsyapurāṇa is an encyclopaedia' - Discuss.

૫ નીચેનામાંથી ગમે તે **બે** વિશે નોંધ લખો :

**5** Write notes on any **two** of the following :

(१) पृथुचरितम्

(२) युगधर्माः ।

(३) दण्डनीतिः ।

(४) आन्ध्रवंशवर्णनम् ।

## (5) सांख्ययोगशास्त्रम् (Optional)

### (पातञ्जलयोगसूत्रम्)

१ નીચેનામાંથી ગમે તે **ચાર** સૂત્રો સમજાવો : **૧૬**

**1** Explain any **four** of the following : **16**

(१) वृत्तिसारूप्यमितरत्र ॥१.४॥

(२) श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषा ॥१.२०॥

(३) क्लेशमूलः कर्माशयो दृष्टादृष्टजभवेदनीयः ॥२.१२॥

(४) विवेकख्यातिरविप्लवाहानोपायः ॥२.२६॥

(५) संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम् ॥३.१८॥

(६) मैत्र्यादिषु बलानि ॥३.२३॥

(७) जन्मौषधिमन्त्रतपः समाधिजाःसिद्धयः ॥४.१॥

(८) ततः क्लेशकर्मनिवृत्तिः ॥४.३०॥

२ (અ) ગમે તે **એક** ગદ્યખંડ સાનુવાદ સમજાવો : ८

**2** (a) Explain and translate with context any **one** : **8**

(१) इन्द्रियप्रणालिकयाचितस्य बाह्यवस्तूपरागातद्विषयः सामान्य-विशेषात्मनोऽर्थस्य विशेषावधारणप्रधाना वृत्तिः प्रत्यक्षं प्रमाणम्। फलमविशिष्टः पौरुषेयश्चित्तवृत्तिबोधः। बुद्धेःप्रतिसंवेदी पुरुष इति उपरिष्टादुपपादयिष्यामः ॥१.७॥

(२) तस्याश्चामित्रागोष्पपदवद्वस्तुस त्त्वं विज्ञयेम्। यथा नामित्रो मित्राभावो, न मित्र मात्रं किन्तु तद्विरुद्धः सपत्नः। तथाऽगोष्पपदं न गोष्पपदभावो न गोष्पदमात्रं किन्तु देश एव ताभ्यामन्यद्, वस्त्वन्तरम्। एवमविद्या न प्रमाणं न प्रमाणाभावः किं तु विद्याविपरीतं ज्ञानान्तरमविद्येति॥ (२.४)

२ (બ) નીચેનામાંથી ગમે તે **એક** સસન્દર્ભ સમજાવો : ६

**2** (a) Explain with context any **one** : **6**

(१) शब्दसन्देहनिमित्तमर्थसन्देहमपनयति। योगःसमाधिरिति। 'युज' समाधौ इत्यस्मात् व्युत्पन्नः समाध्यर्थो न तु 'युजिर योग' इत्यस्मात् संयोगार्थ इत्यत आह स च सार्वभौमः ॥१.१. तत्त्व वै॥

(२) ननु प्रथमपादेनैव सोपायः सावान्तरप्रभेदः सफलो योग उक्तस्तत् किमवशिष्यते यदर्थं द्वितीयः पादः प्रारभ्येतेत्यत आह–उद्दिष्ट इति। अभ्यासवैराग्ये हि योगोपायौ प्रथमे पाद उक्तौ। न च तौ व्युत्थित–चित्तस्य द्रागित्येव स भवत इति द्वितीयपादोपदेश्यानुपायानपेक्षते सत्त्वशुद्ध्यर्थम् ॥२.१. तत्त्व वै.॥

२ (ક) નીચેનામાંથી કોઈ **એક** ગદ્યખંડ સસન્દર્ભ સમજાવો : ६

**2** (c) Explain giving context, any **one** : **6**

(१) तेऽपि चासमाप्तकार्ये चेतसि स्वेच्छयैव प्रकृतिलीने संस्कारशेषे सत्यसंप्रज्ञातयोगं कैवल्यपदमिव प्राप्नुवन्ति यावदधिकारशेष वशात्, चितं पुनर्व्युत्थितं न भवति तस्यापि भवप्रत्यय इति शेषः। अधिकारसमाप्तौ च तेऽ पि मुच्यन्त इत्याशयः ॥१.१९. यो.वा.॥

(२) एक एवाद्वितीयं ब्रह्मासीत्। तस्मादव्यक्तमेकाक्षरं तस्मादक्षरान्महत्, महतो वै अहंकार तस्मादेवाहंकारात् पञ्चतन्मात्राणि, तेभ्यो भूतादीनीति। वेदान्तसूत्रैरपि बुद्ध्यादिक्रमेणैव सृष्टिरुक्ता, तत्र नवीनानां कुव्याख्याद्यास्माभिस्तद्भाष्यमेवापास्तेति ॥२.१९ यो.वा.॥

૩ (અ) નીચેનું સૂત્ર સહિતનું વ્યાસભાષ્ય સન્દર્ભ સહિત સમજાવો : ૬

**3** (a) Explain with context the following सूत्रम् and भाष्यम् **6**

अथ योगानुशासनम्। (१.१) अथेत्ययमधिकारार्थः। योगानुशासनं शास्त्रमधिकृतं वेदितव्यम्। योगःसमाधिः। स च सार्वभौमश्चित्तस्य धर्मः॥

**અથવા/OR**

૩ (અ) નીચેનું સૂત્ર અને ભાષ્યની સસન્દર્ભ સમજૂતી આપો : ૬

**3** (a) Explain with context the following Aphorism Vyas anotation (सूत्रम् and व्यास भाष्यम्)

उक्तानि पञ्च बहिरङ्गानि साधनानि। धारणा वक्तव्या देशबन्धश्चित्तस्य धारणा (सूत्रम् ३.१) नाभिचक्रे, हृदयपुण्डरीके मूर्ध्नि ज्योतिषि नासिकाग्रे जिह्वाग्र इत्येवमादिषु देशेषु बाह्ये वा विषये चित्तस्य वृत्तिमात्रेण बन्ध इति धारणा॥

૩ (બ) નીચેના ઉપર વિસ્તૃત નોંધ લખો : ગમે તે **એક** ૧૦

**3** (b) Write full fledge note on any one of the following : **10**

(१) परिकर्माणि

(२) पञ्च चित्तस्य भूमयः।

૪ ''वृत्तयः पञ्चतय्यः सविस्तर સમજાવો. ૧૬

**4** Discuss fully ''वृत्तयः पञ्चतय्यः। **16**

**અથવા/OR**

૪ યોગસમ્મત પરિણામના સિદ્ધાંતને સ્પષ્ટ રીતે સમજાવો. ૧૬

**4** Explain clearly and fully the theory of transformation according to Yoga–philosophy. **16**

૫ યોગનાં આઠે ય અંગોની વિસ્તૃત ચર્ચા કરો. ૧૬

**5** Explain clearly and fully eight योगाङ्गानि। **16**

**અથવા/OR**

૫ કોઈ પણ **બે** ઉપર વિવેચનાત્મક નોંધ લખો : **૧૬**

**5** Write critical note on any **two** : **16**

(૧) अध्यात्मप्रसादः

(૨) ऋतंभरा प्रज्ञा

(૩) ससंप्रज्ञात समाधिः।

૬ વિભૂતિ એટલે શું ? વિભૂતિપાદના આધારે સિદ્ધિઓનું સવિસ્તર વર્ણન કરો. **૧૬**

**6** What is विभूतिः ? Discuss सिद्धय: in details according to the विभूतिपाद॥ **16**

**અથવા/OR**

૬ નીચેનામાંથી ગમે તે **બે** ઉપર વિવેચનાત્મક નોંધ લખો : **૧૬**

**6** Write critical note on any **two** : **16**

(૧) कैवल्यसिद्धान्त

(૨) योगदर्शने ईश्वरः

(૩) अविद्यायाः स्वरूपम्

(૪) विज्ञानवादस्य खण्डनम् ।